This Question Paper consists 35 questions and 7 printed pages.
**अस्मिन् प्रश्नपत्रे 35 प्रश्नाः सन्ति। 7 मुद्रितपुटानि च सन्ति ।**

**Sl. No.**

| Roll No. **अनुक्रमांङ्क** | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|

Code No. **गुढसंख्या** **60/SS/A**

**Set /स्तबकः A**

# VEDA ADHYAYAN
# वेदाध्ययनम्
# (345)

Day and Date of Examination
**(परीक्षादिनंः दिनाङ्कश्च)** ____________________

Signature of Invigilators
**(निरीक्षकयोः हस्ताक्षरम्)**
1. ____________________
2. ____________________

**सामान्य निर्देशा :**

1. अनुक्रमाङ्क : प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
3. वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गुढसंख्या 60/SS/A-A नूंन लेख्या।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

# VEDA ADHYAYAN

# वेदाध्ययनम्

# (345)

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)] [पूर्णाङ्काः : **(Full Marks) 100**

---

**निर्देशाः** (i) अस्मिन् प्रश्नपत्रे **[A]** भागे **10, [B]** भागे **10, [C]** भागे **10, [D]** भागे **5,** इति आहत्य **35** प्रश्नाः सन्ति ।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु ( प्रश्नाः × अङ्काः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

(iii) समे प्रश्ना अनिवार्याः ।

---

**[A]** दशानां युक्तं विकल्पं चिनुत । **[10 × 1 = 10]**

**1.** यजुर्वेदस्य कति विभागाः सन्ति।

(क) एकः

(ख) द्वौ

(ग) त्रयः

(घ) न एकोऽपि

**2.** जगतीछन्दसः अक्षरसंख्या भवति।

(क) चत्वारिंशत्

(ख) षट्त्रिंशत्

(ग) द्वात्रिंशत्

(घ) अष्टचत्वारिंशत्

3. साम इत्यत्र अमो नाम किम्।

(क) अक्षरम्

(ख) स्वरः

(ग) सङ्गीतम्

(घ) वेदः

4. तक्मा: किम् भवति।

(क) ज्वरस्य नाम

(ख) ओषधिनाम

(ग) कुष्ठस्य नाम

(घ) वातरोगस्य नाम

5. अङ्गिरः इति सम्बोधनं भवति।

(क) विष्णोः

(ख) प्रजापतेः

(ग) अग्नेः

(घ) रुद्रस्य

6. पुरूषस्य चक्षोः किम् उत्पन्नम्।

(क) अग्निः

(ख) सूर्यः

(ग) वायुः

(घ) हिरण्यगर्भः

7. यथा __________ असुरेषु श्रद्धामुग्रेषु चक्रिरे।

(क) मानवाः

(ख) देवाः

(ग) मुनयः

(घ) सर्पाः

8. देवीसुक्तं भवति।

(क) आध्यात्मिकसूक्तम्

(ख) प्रत्यक्षसूक्तम्

(ग) परोक्षसूक्तम्

(घ) न एकमपि

9. पूर्वे भूतपूर्वे इत्यनेन कस्य प्रकृतिस्वरो भवति।

(क) उत्तरपदस्य

(ख) मध्यपदस्य

(ग) पूर्वपदस्य

(घ) न एकस्यापि

10. तद्धितस्य इति कीदृशं सूत्रम्।

(क) विधिसूत्रम्

(ख) निषेधसूत्रम्

(ग) उभयविधम्

(घ) न एकमपि

[B] दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत। [10 × 2 = 20]

11. दानस्तुतीनाम् उल्लेखः कुत्र प्राप्यते? अस्य ग्रन्थस्य कः रचयिता?

12. अथर्ववेदस्य कति ब्राह्मणग्रन्थाः सन्ति? आरण्यकस्य च किं नाम?

13. शिवसंकल्पसूक्ते कस्य उपासना क्रियते? किं चात्र कारणम्?

14. निरुक्ते कति देवताः प्राधान्येन स्वीकृताः? काश्च ताः?

15. प्रजापतिसूक्तं कुत्र वर्तते? अस्मिन् सूक्ते कति मन्त्राः सन्ति?

16. उदात्तेन सह एकादेशे कदा स्वरितस्वरो भवति? अत्र किमुदाहरणम्?

17. कर्तृवाचिनः अशितशब्दस्य कः स्वरः? किं च सूत्रम्?

18. संज्ञायाम् उपमानशब्दस्य कः स्वरः केन सूत्रेण भवति?

19. फिट् नाम किम्? तस्य कः स्वरो भवति?

20. अतिङन्तात् परस्य तिङन्तस्य कः स्वरो भवति? एकम् उदाहरणं लिखत?

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त। **[10 × 4 = 40]**

**21.** ऋङ्मन्त्रेषु कुत्र कुत्र केषां रसानां प्रयोगः प्राप्यते?

**22.** यो ज्योतिषं वेद स वेद यज्ञान् इत्यस्य तात्पर्यं विवृणुत।

**23.** छन्दःशास्त्रमाश्रित्य टीकां लिखत।

**24.** मया सो अन्नमत्ति इत्यस्य तात्पर्यं मन्त्रोल्लेखपूर्वकं प्रतिपादयत।

**25.** मनुना मत्स्यस्य पालनं कथं कृतमिति कथामाश्रित्य लिखत अथवा मनुमत्स्यकथामाश्रित्य प्लावनवृत्तान्तं विवृणुत।

**26.** विष्णुमाहात्म्यम् सूक्तमाश्रित्य समासेन विवृणुत।

**27.** वृषादिगणे पठितानां शब्दानां स्वरविधायकं सूत्रं व्याख्यायताम्।

**28.** उञ्छादीनां स्वरविधायकं सूत्रं सोदाहरणं व्याख्यात।

**29.** लोपे विभाषा इति सूत्रस्य सोदाहरणं व्याख्यानं कर्तव्यम्।

**30.** कुमारश्रमणा इति पदस्य स्वरसाधनं कुरुत।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः। **[5 × 6 = 30]**

**31.** षड्दर्शनेषु वेदस्य प्रामाण्यं प्रतिपादयत।

**32.** अग्निसूक्तस्य अन्तिममन्त्रस्य व्याख्यानं कुरुत।

**33.** प्रजापतिस्वरूपं ग्रन्थानुसारं प्रकटयत अथवा रुद्रस्वरुपं समासेन विवृणुत।

**34.** विस्पष्टादीनि गुणवचनेषु इति सूत्रस्य सोदाहरणं विश्लेषणं कुरुत।

**35.** ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः इति सूत्रं सोदाहरणं व्याख्यात।

♦ ♦ ♦